धान्याकपानकम् । शिलायां साधु संपिष्टं धान्यकं वस्त्रगालितम् । शर्करोदकसंयुक्तं कर्पूरादिसुसंस्कृतम् । नूतने मृण्मये पात्रे स्थितं पित्तहरं परम् ।

अथ काञ्जी । काञ्जीविविवेटकावसरे लिखितः । काञ्जीकं रोचनं रुच्यं पाचनं वह्निदीपनम् । शूलजीर्णविबन्धघ्नं कोष्ठशुद्धिकरं परम् । न भवेत् काञ्जिकं यत्र तत्र जालिः प्रदीयते ।

अथ जालिः । आममाम्रफलं पिष्टं राजीकालवणान्वितम् । भृष्टहिङ्गुयुतं पूतं घोलितं जालिरुच्यते । जालिर्हरति जिह्वायाः कुण्ठत्वं कण्ठशोधनी । मन्दमन्दन्तु पीता सा रोचनी वह्निवर्द्धिनी ।

अथ तक्रम् । तुर्य्यांशेन जलेन संयुतमतिस्थूलं सदम्लं दधि प्रायो माहिषमम्बुकेन विमले मृद्भाजने घोलयेत् । भृष्टं हिङ्गु च जीरकञ्च लवणं राजीञ्च किञ्चिन्मिताम् पिष्टान्तत्र विमिश्रयेद्भवति तत्तक्रं न कस्य प्रियम् । तक्रं रुचिकरं वह्निदीपनं पाचनं परम् । उदरे ये गदास्तेषां नाशनं तृप्तिकारकम् ।

अथ दुग्धम् । विदाहीन्यन्नपानानि यानि भुङ्क्ते हि मानवः । तद्विदाहप्रशान्त्यर्थं भोजनान्ते पयः पिबेत् । दुग्धस्यापरे गुणा उक्ता एव दुग्धवर्गे ।

अथ सक्तवः । धान्यानि भ्राष्ट्रभृष्टानि यन्त्रपिष्टानि सक्तवः ।

तत्र यवसक्तवः । यवजाः सक्तवः शीता दीपना लघवः सराः । कफपित्तहरा रूक्षा लेखनाश्च प्रकीर्त्तिताः । ते पीता बलदा वृष्या वृंहणा भेदनास्तथा । तर्पणा मधुरा रुच्याः परिणामे बलावहाः । कफपित्तश्रमक्षुत्तृड्व्रणनेत्रामयापहाः । प्रशस्ता घर्मदाहाढ्यव्यायामार्त्तशरीरिणाम् ।

चणकयवसक्तवः । निस्तुषैश्चणकैर्भृष्टैस्तुर्य्यांशेन यवैः कृताः । सक्तवः शर्करासर्पिर्युक्ता ग्रीष्मेऽतिपूजिताः ।

शालिसक्तवः । सक्तवः शालिसम्भूता वह्निदा लघवो हिमाः । मधुरा ग्राहिणो रुच्याः पथ्याश्च बलशुक्रदाः । न भुक्त्वा न रदैश्छित्त्वा न निशायां न वा बहून् ।

न जलान्तरितान् तद्वि सक्तूनद्यान्न केवलान् । पृथक् पान पुनर्दानं आमिषं पयसा निशि । दन्तच्छेदनमुष्णञ्च सप्त सक्तुषु वर्जयेत् ।

अथ धाना(बहुरी) यवास्तु निस्तुषा भृष्टाः स्मृता धाना इति स्त्रियाम् । धानाः स्युर्दुर्जरा रूक्षास्तृट्प्रदा गुरवश्च ताः । तथा मेहकफच्छर्द्दिनाशिन्यः सम्प्रकीर्त्तिताः ।

अथ लाजाः । येषां स्युस्तण्डुलास्तानि धान्यानि सतुषाणि च । भृष्टानि स्फुटितान्याहुर्लाजा इति मनीषिणः । लाजाः स्युर्मधुराः शीता लघवो दीपनाश्च ते । स्वल्पमूत्रमला रूक्षा बल्याः पित्तकफच्छिदः । छर्द्यतीसारदाहास्रमेहमेदस्तृषापहाः ।

अथ पृथुकाः(चिड्आ) । शालयः सतुषा आर्द्रा भृष्टा अस्फुटिताश्च ते । कुट्टिताश्चिपिटाः प्रोक्तास्ते स्मृताः पृथुका अपि । पृथुका गुरवो वातनाशनाः श्लेष्मला अपि । सक्षीरा वृंहणा वृष्या बल्या भिन्नमलाश्च ते ।

अथ होलकः (होरहा) । अर्द्धपक्वैः शमीधान्यैस्तृणभृष्टैश्च होलकः । होलकोऽल्पानिलो मेदःकफदोषत्रयापहः । भवेद्यो होलको यस्य स च तत्तद्गुणो भवेत् ।

अथ उची । मञ्जरी त्वर्द्धपक्वा या यवगोधूमयोर्भवेत् । तृणानलेन संभृष्टा बुधैरुचीति सा स्मृता । (उमिया) इति लोके । उची कफप्रदा बल्या लघ्वी पित्तानिलापहा ।

अथ कुल्माषाः(घुघुनी) अर्द्धस्विन्नास्तु गोधूमा अन्येऽपि चणकादयः । कुल्माषा इति कथ्यन्ते शब्दशास्त्रेषु पण्डितैः । कुल्माषा गुरवो रूक्षा वातला भिन्नवर्चसः ।

अथ पललम् (तिलकुट) पललन्तु समाख्यातं सैत्वन्तिलपिष्टकम् । पललं मलकृद्वृष्यं वातघ्नं कफपित्तकृत् । वृंहणञ्च गुरु स्निग्धं मूत्राधिक्यनिवर्त्तकम् ।

अथ पिण्याकः (पीना) । तिलकुट्टन्तु पिण्याकस्तथा तिलखलः स्मृतः । पिण्याको लेखनो रूक्षो विष्टम्भी दृष्टिदूषणः ।

अथ (चाउर) तण्डुलो मेहजन्तुघ्नः स नवस्त्वतिदुर्जरः" ।

अन्येऽपि कृतान्नप्रकाराः पाकशास्त्रे दृष्टाः

कृतान्नविशेषगुणाश्च सुश्रुते दर्शिता यथा

"अतः परं प्रवक्ष्यामि कृतान्नगुणविस्तरम् । लाजमण्डो विशुद्धानां पथ्यः पाचनदीपनः । वातानुलोमनो हृद्यः पिप्पलीनागरायुतः । स्वेदाग्निजननी लघ्वी दीपनी बस्तिशोधनी । क्षुत्तृट्श्रमग्लानिहरी पेया वातानुलोमनी । विलेपी तर्पणी हृद्या ग्राहिणी बलवर्द्धनी । पथ्या स्वादुरसा लघ्वी दीपनी क्षुत्तृषापहा । हृद्या सन्तर्पणी वृष्या वृंहणी बलवर्द्धनी । शाकमांसफलैर्युक्ता यवाग्वस्ताश्च दुर्जराः । सिक्थैर्विरहितो मण्डः, पेया सिक्थसमन्विता । विलेपी बहुसिक्था स्याद्यवागूर्विरलद्रवा । विष्टम्भी पायसो बल्यो मेदःकफकरो गुरुः । कफपित्तकरी बल्या कृशराऽनिलनाशनी । धौतस्तु विमलः शुद्धो मनोज्ञः सुरभिः समः । स्विन्नः सुप्रस्रुत-